शानः" भाग० ७।४।११ "कोश(ष)कृत् कोशकारः" श्रीधरः

**कोश(ष)स्थ** पु० कोशे(षे)तिष्ठति स्था—क ७त० । सुश्रुतोक्ते शङ्खादिके जन्तुभेदे। "आनूपवर्गस्तु पञ्चविधः" इत्युपक्रम्य कोशस्था इत्युद्दिश्य "शङ्ख शङ्खनख शुक्तिशम्बूकभल्लूकप्रभृतयः कोशस्थाः पादिनश्च" इत्युक्त्वा कूर्म्मादींश्चोक्त्वा तन्मांसगुणा उक्ता यथा "शङ्खकूर्म्मादयः स्वादुरसगन्धा मरुन्नुदः। शीताः स्निग्धा हिताः पित्ते वर्चस्याः श्लेष्मवर्द्धनाः"

**कोशा(षा)गार** न० ६त०। धनागारे (खाजनाघर) "कोषागारमायुधागारमश्वशालां हस्तिशालाञ्च कुरु" भा० व० १६७ कोश(ष)गृहादयोऽप्यत्र न० [कड़ा) क्षुपभेदे हारा०

**कोशा(षा)ङ्ग** न० कोशः(षः)इवाङ्गमस्य। बद्धमूले इत्कटौ(ओ-

**कोशा(षा)तक** पु० कोश(ष)मतति अत—क्वुन्। १कठे वेदशाखाभेदे २पटोल्याम् घोषके (तरुइ) (झोङा) ख्याते शाकभेदे स्त्री मेदि० गौरा० ङीष्। भावप्र० इयं राजसेव्यत्वात् महत्त्वाद्वा राजोपपदा निर्द्दिष्टा "धामार्गवः पीतपुष्पा जालिनी कृतवेधना। राजकोशातकी चेति तथोक्ता राजिमत्फला। राजकोशातकी शीता मधुरा कफवातला। पित्तघ्नी दीपनी श्वासज्वरकासकृमिप्रणुत्" "कोषातकीवल्लिभवाऽप्यपल्लवास्तक्रेण युक्ताः सुघृतेन संस्कृताः। सम्भर्जिताः सैन्धवहिङ्गुवाधिते तैलेऽतिरुच्या बहुपुष्टिदायकाः" तस्याः फलम् अण् हरीतक्या० लुप्। तत्फले स्त्री "कोशातकीपुष्पगुलुच्छकान्तिभिः" म० ब०

**कोशा(षा)म्र** पु० को(शो)षे आम्र इव। १फलप्रधानवृक्षभेदे (कोशाम) "कोशाम्रः कुष्ठशोथास्रपित्तव्रणकफापहः। तत्फलं ग्राहि वातघ्नमम्लोष्णं गुरु पित्तलम्। पक्वं तु दीपनं रुच्यं लघूष्णं कफवातहृत्" भावप्र०। (केओड) २फलवृक्षे राजवल्लभः

**कोशि(षि)न्** त्रि० कोश(ष)+अस्त्यर्थे इनि। १कोश(ष)युक्ते आमोपपदकोशी तु सुश्रुतोक्ते कर्णबन्धनजे रोगभेदे "बद्धमात्रस्तु यः कर्णः सहसैवाभिवर्द्धयेत्। आमकोशी समाख्यातः क्षिप्रमेव विशुध्यते"। २आम्रवृक्षे पु० शब्दमाला।

**कोशि(षि)ला** स्त्री कोश+अस्त्यर्थे पिच्छादित्वाद् इलच्। सुद्गपर्ण्याम् राजनि०

**कोशी(षी)** स्त्री कुश—(कुष) अच् गौरा० ङीष्। १चर्म्मपादुकायाम् २धान्याद्यग्रभागे च (शुङ्गा) हेम०

**कोश्य(ष्य)** त्रि० कोशे हृदयकोशे(षे)भवः यत्। हृदयकोश मांसपिण्डे "प्लिहानि कोश्याभ्याम्" यजु० २५।२८ "कोश्याभ्यां हृदयस्य मांसपिण्डाभ्याम्" वेददी०

**कोष** पु०न०। कुष—पचादि० अच्। १कोशशब्दार्थे कोशशब्दे विवृतिः। २ऋषिभेदे। "अथोह कोषा धावयन्तः शत० ब्रा० १०।५।५।८ "कोषानाम ऋषयः" भा०।

**कोषक** पु० कोष—स्वार्थे क। अण्डकोषे शब्दर०

**कोषला** स्त्री० कोष—अलच्। अयोध्यायां पुर्य्यां शब्दरत्ना०

**कोष्ठ** पु० कुष—थन्। १गृहमध्ये, २उदरमध्ये, ३धान्यादिस्थापने ४कुसूले च (कुठी) ५आत्मीये त्रि० मेदि० "स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च। हृदुण्डुकः फुप्फुसश्च कोष्ठ इत्यभिधीयते" ६सुश्रुतोक्ते आमाग्निपक्वमूत्ररुधिरस्थाने "प्रवाहिका शिरः शूलं कोष्ठशूलञ्च दारुणम्" "चले दोषे मृदौ कोष्ठे नेक्षेतात्र बलं नृणाम्" सुश्रु० "भुक्तं भुक्तमिदं कोष्ठे कथमन्नं विपच्यते" भा० आश्व० ५७ श्लो० "पतिं भार्य्योपतिष्ठेत ध्यायेत् कोष्ठगतं यथा" भा० भी० ६।१८। ५२। अकथहादिचक्रचतुःपार्श्वस्थरेखाचतुष्कान्विते ७स्थानभेदे अकथहशब्दे २८पृ० उदा०। ८पदे स्थानमात्रे "पञ्चारामं नवद्वारमेकपालं त्रिकोष्ठकम्। यत् पञ्चविपणम् क्षेत्रं पञ्चप्रकृतिस्त्रीधरम्। पञ्चेन्द्रियार्था आरामा द्वारः प्राणा नव प्रभो!। तेजोऽबन्नानि कोष्ठानि कुलमिन्द्रियसंग्रहः। विपणस्तु क्रियाशक्तिर्भूतप्रकृतिरव्यया" भाग० ४।२८।५१।५२।५२। कुसूले "जरत्कोष्ठाद्व्रीहीन्ककरीभिरिश्नानाहरति" कौषीतकिब्रा०

**कोष्ठागार** न० कोष्ठमगारमिव। धान्यधनादेःस्थापने गृहे (कुठी) "कोष्ठागारायुधागारदेवतागारभेदकान्" मनुः "कोष्ठागारं तु ते नित्यं स्फीतं धान्यैः सुसंवृतम्। सदास्तु सत्सु संन्यस्तं धनधान्यपरोभव" भा० आ० ११९अ०

**कोष्ठागारिक** त्रि० कोष्टागरे भवः तत्र नियुक्तोवा वा० ठन्। १कोष्ठागारभवे। "अत्यर्थं स्रवति रक्तं कोष्ठागारिकाङ्गारवत्पिण्डेत्यादि" सुश्रु० २कोष्ठागारे नियुक्ते च।

**कोष्ठागारिन्** पु० कोष्ठरूपमगारमिवास्त्यस्य इनि। कीटभेदे "कोष्ठागारी कृमिकरश्च मण्डलपृष्ठकः" सुश्रुते प्राणनाशककीटोक्तौ

**कोष्ण** न० ईषदुष्णम् कोः कादेशः। १ईषदुष्णस्पर्शे २तद्वति त्रि० अमरः। "भुवं कोष्णेन पीनोघ्नी मेध्येनावभृथादपि" रघुः "घृतेन वा शान्तिमुपैति जिह्वा कोष्णेन यष्टीमधुकान्वितेन" "शोथं सतोदं कोष्णेन सर्पिषा परिषेचयेत्" सुश्रु०